योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०१३

अज्ञातलेखकः

निर्वाणप्रकरणस्य पूर्वार्धम्

सर्गः १
सर्गः २
सर्गः ३
सर्गः ४
सर्गः ५
सर्गः ६
सर्गः ७
सर्गः ८
सर्गः ९
सर्गः १०
सर्गः ११
सर्गः १२
सर्गः १३
सर्गः १४
सर्गः १५
सर्गः १६
सर्गः १७
सर्गः १८
सर्गः १९
सर्गः २०
सर्गः २१
सर्गः २२
सर्गः २३
सर्गः २४
सर्गः २५
सर्गः ६५
सर्गः ६६
सर्गः ६७
सर्गः ६८
सर्गः ६९
सर्गः ७०
सर्गः ७१
सर्गः ७२
सर्गः ७३
सर्गः ७४
सर्गः ७५
सर्गः ७६
सर्गः ७७
सर्गः ७८
सर्गः ७९
सर्गः ८०
सर्गः ८१
सर्गः ८२
सर्गः ८३
सर्गः ८४
सर्गः ८५
सर्गः ८६
सर्गः ८७
सर्गः ८८
सर्गः ८९

सर्गः २६
सर्गः २७
सर्गः २८
सर्गः २९
सर्गः ३०
सर्गः ३१
सर्गः ३२
सर्गः ३३
सर्गः ३४
सर्गः ३५
सर्गः ३६
सर्गः ३७
सर्गः ३८
सर्गः ३९
सर्गः ४०
सर्गः ४१
सर्गः ४२
सर्गः ४३
सर्गः ४४
सर्गः ४५
सर्गः ४६
सर्गः ४७
सर्गः ४८
सर्गः ४९
सर्गः ५०
सर्गः ५१
सर्गः ९०
सर्गः ९१
सर्गः ९२
सर्गः ९३
सर्गः ९४
सर्गः ९५
सर्गः ९६
सर्गः ९७
सर्गः ९८
सर्गः ९९
सर्गः १००
सर्गः १०१
सर्गः १०२
सर्गः १०३
सर्गः १०४
सर्गः १०५
सर्गः १०६
सर्गः १०७
सर्गः १०८
सर्गः १०९
सर्गः ११०
सर्गः १११
सर्गः ११२
सर्गः ११३
सर्गः ११४
सर्गः ११५

सर्गः ५२ सर्गः ११६

सर्गः ५३ सर्गः ११७

सर्गः ५४ सर्गः ११८

सर्गः ५५ सर्गः ११९

सर्गः ५६ सर्गः १२०

सर्गः ५७ सर्गः १२१

सर्गः ५८ सर्गः १२२

सर्गः ५९ सर्गः १२३

सर्गः ६० सर्गः १२४

सर्गः ६१ सर्गः १२५

सर्गः ६२ सर्गः १२६

सर्गः ६३ सर्गः १२७

सर्गः ६४ सर्गः १२८

त्रयोदशः सर्गः १३

श्रीराम उवाच ।

सम्यग्ज्ञानविलासेन वासनाविलयोदये ।

जीवन्मुक्तपदे ब्रह्मन्नूनं विश्रान्तवानहम् ।। १

प्राणस्पन्दनिरोधेन वासनाविलयोदये ।

जीवन्मुक्तपदे ब्रह्मन्वद विश्रम्यते कथम् ।। २

श्रीवसिष्ठ उवाच ।

संसारोत्तरणे युक्तिर्योगशब्देन कथ्यते ।

तां विद्धि द्विप्रकारां त्वं चित्तोपशमधर्मिणीम् ।। ३

आत्मज्ञानं प्रकारोऽस्या एकः प्रकटितो भुवि ।

द्वितीयः प्राणसंरोधः श्रृणु योऽयं मयोच्यते ।। ४

श्रीराम उवाच ।

सुलभत्वाददुःखत्वात्कतरः शोभनोऽनयोः ।

येनावगतमात्रेण भूयः क्षोभो न बाधते ।। ५

श्रीवसिष्ठ उवाच ।

प्रकारौ द्वावपि प्रोक्तौ योगशब्देन यद्यपि ।

तथापि रूढिमायातः प्राणयुक्तावसौ भृशम् ।। ६

एको योगस्तथा ज्ञानं संसारोत्तरणक्रमे ।

समावुपायो द्वावेव प्रोक्तावेकफलप्रदौ ।। ७

असाध्यः कस्यचिद्योगः कस्यचिज्ज्ञाननिश्चयः ।

मम त्वभिमतः साधो सुसाध्यो ज्ञाननिश्चयः ।। ८

अज्ञानं पुनरज्ञातं स्वप्नेष्वपि न तद्भवेत् ।

ज्ञानं सर्वास्ववस्थासु नित्यमेव प्रवर्तते ।। ९

धारणासनदेशादिसाध्यत्वेन सुसाध्यताम् ।

नायाति योगो ह्यथवा विकल्पो नैव शोभनः ।। १०

द्वावेव किल शास्त्रोक्तौ ज्ञानयोगौ रघूद्वह ।

तत्रोक्तं भवते ज्ञानमन्तस्थं ज्ञेयनिर्मलम् ।। ११

प्राणापानतया रूढो दृढदेहगुहाशयः ।

अनन्तसिद्धिदः साधो योगोऽयं बुद्धिदः श्रृणु ।। १२

मुखानिलस्फुरणनिरोधसंभव-

स्थितिं गतो नृपसुत चेतसाऽक्षये ।

समाहितस्थितिरिह योगयुक्तितः

परे पदे प्रगलितगीर्निवत्स्यसि ।। १३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये देव० मोक्षोपायेषु निर्वाणप्रकरणे पू० ज्ञानविचारयोगोपदेशो नाम त्रयोदशः सर्गः ।। १३ ।।